CC-0. Digitized by eGangotri and MIDF- Delhi

१००

पशुघातन विधि· माहिष वलिदान

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प.घा. श्रीगणेशायनमः॥ ॥अथपशुघातनविधिः॥तत्रादौमहिषबलिदानं॥स्वयंउत्तराभि
1 मुखः पूर्वाभिमुखंबलिंनिरीक्ष्य॥आदौमहिषस्नानं॥ॐअद्यामुकगोत्रस्यममैतज्ज
न्मनिसर्वशत्रुक्षयपूर्वकदिग्विजयकामः कुशजलेनमहिषस्याऽसंप्रोक्षयिष्ये॥तन्मं
त्रश्च॥प्राणिनामुपकारार्थंपशुश्रेष्ठोमयाधुना॥प्रोक्षितोभवतीप्रीत्येतन्मेवर्षचिभा
वय॥अथपशुन्यासः॥शिरसिरुधिरवक्त्रायैनमः॥चक्षुषोश्चन्द्रादित्याभ्यांनमः॥मुखे
सरस्वत्यैनमः॥पृष्ठेमहाभैरवायनमः॥उदरेमहोदर्यैनमः॥जंघयोर्भैरव्यैनमः॥ह्रांह्रीं
ह्रूंह्रैंह्रौंह्रः सर्वांगायनमः॥ ॥ततोमहिषपूजा॥ॐअद्येत्यादिममैतज्जन्मनिसर्वशत्रुक्षय
पूर्वकदिग्विजयकामएभिरुपचारैर्महिषमहंपूजयिष्ये॥इतिसंकल्प्य॥ततोऽर्घपात्रं
धूपपुष्पाक्षतान्क्षिप्त्वा॥एतानिपाद्यादिगंधपुष्पाक्षतनैवेद्यान्तंनिवेद्य॥पृष्ठेस्वस्तिकृत्वा॥
रक्षार्थंमहिषमस्तकेअलक्तसिंदूरंविलिप्यपद्ममालांदत्वा॥ततोकृतांजलिः पठेत्॥ रामः
पशोत्वंबलिरूपेणममभाग्यादुपस्थितः॥प्रणमामिततःसर्वरूपिणंबलिरूपिणं॥चं 1

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ॐ श्रीकौशिकीरुधिरेणाप्यायतां ॥ ॐ अद्य अमुकस्यारोग्यकुलशतनरकादुत्तरणपूर्वकब्रह्मलोकम
हितत्वकाम एतानि पशुरुधिराणि साग्नीनि भगवत्यै दुर्गादेव्यै तुभ्यमहं संप्रददे ॥ घोरदंष्ट्र
विशालाक्षी मद्यमांसरुधिरप्रिये ॥ मत्कृतं गृहाण देवि त्वं वरदे हि यथेप्सितं ॥ तत स्थाने हुंकौ
पः इति विशेषः ॥ इति रुधिरदानं ॐ कुतरनमः फट् स्वाहा ॥ ॥ अथ छागोत्सर्गः ॥ त्वं भ
वीसुदेवस्त्र शंकरस्य महोदय ॥ सदाराश्च सपुत्राश्च सगणाश्च सशक्तय ॥ प्रोक्ष्यनु त्वां प
शुश्रेष्ठ एते विघ्नस्य हेतव ॥ इति छागसेचनं ॥ छागाय स्नानि पाद्यार्घ्यं च मनीय पुनराचम
नीयानि छागाय नमः ॥ गंधपुष्पाक्षतस्रग्दीपनैवेद्यानि छागाय नमः इति ॥ ॐ अद्येत्या
दि देशकालौ संकीर्त्य अमुकगोत्रस्यामुकशर्मणः सदारसपत्यस्याशेषदुरितानिना
नाविधकल्याणोत्पत्तिरोगायुर्बलपुष्टिराजसंमानदुर्गाप्रीतिकामनया अमुकछागंब
लिरूपेण भगवत्यै दुर्गादेव्यै हुं फट् घातयिष्ये ॥ इति छागबलिदानं ॥ ॥ अथ कूष्माण्डदाने ॥
ॐ अद्य कुष्मांडय महामाहिषफलतुल्यापमहाद्भुतदानभाय श्रीदुर्गात्रिपुरसुंदरी महाष्ट

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

२·पा· मीनवमीसंयुक्तायमहाकाली शाकंभरीप्रियाय मम सकलशत्रुदुष्टजंभ रक्षय भक्षय
३ प्रसादं कुरु २ मम राष्ट्रं दह २ पर इमं कुष्मांडबलिं माहिषमर्दिनीप्रीतये घातयिष्ये ॥ इति
कुष्मांडदानं ॥ ॐ अद्य मम सतांपत्यस्य तथा लक्ष्मीसौख्यावाप्तिसर्वापच्छांतीष्टदे
वतादिसकलकर्मणः प्रतिष्ठासिध्यर्थं इदं हिरण्यमग्निदैवतं तन्मूल्योपकल्पि
तं द्रव्यं वा· परमेश्वरीप्रीतये अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रद
दे ॥ ॐ पृथिवी समुद्भवत्वात् अन्नं तस्य तु भोजनं ॥ मया निवेदितं तोयं विष्णुचक्रेण
गृहीतां इति जलशुद्धिः ॥ ब्रह्माण्डोदराणि तीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्ये
न मे देव तीर्थं देहि दिवाकर ॥ इति स्नानानंतरं ॥ चतुर्भुजो महाविष्णुः शंखचक्रग
दाधरः ॥ मनसा ध्यानमात्रेण सर्वपापैः प्रमुच्यते ॥ ॥ इति पशुघातनविधिः समा
प्तम् ॥ शुभम् ॥ संवत् १८८२ मार्गवदि १२ वारे १ श्रीरस्तु ॥ अद्यामुकगोत्रस्यामुक रामः
शर्मणः सदारापत्य [illegible] त्यां नृदीर्घायुर्बल ३

Jagannath Bhattarai Collection: Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तयेनमः ॐ प्रतीच्यैदिशेनमः ॐ वरुणायनमः ॐ वायव्यैदिशेनमः ॐ वायवेनमः ॐ उदीच्यै
दिशेनमः ॐ कुबेरायनमः ॐ ऐशान्यैदिशेनमः ॐ ईशानायनमः ॐ ऊर्ध्वायैदिशेनमः ॐ ब्रह्मणे
नमः ॐ अधोदिशेनमः ॐ अनन्तायनमः ॥ पुनः ॥ ॐ अन्तरिक्षायनमः ॐ अग्नयेनमः ॐ पृथिव्यैनमः
ॐ ओषधिभ्योनमः ॐ वाचेनमः ॐ वाचस्पतयेनमः ॐ विष्णवेनमः ॐ महद्भ्योनमः ॐ
अद्भ्योनमः ॐ अपांपतयेनमः ॐ वरुणायनमः ॐ संवर्चसा पयसा सन्तनूभिरगन्म
हि मनसा सं शिवेन त्वष्टा सुदत्रो विदधातु रायोनुमार्ष्टु तन्वो यद्विलिष्टम् ॥ ११ ॥
मंत्रेणमुखमभिमृश्य ॥ ॐ तच्चक्षुरिति मंत्रेणनामिकांगुष्ठाभ्यांजलेनचक्षुस्पर्शंकु
र्यात् ॥ देवागातुविदोगातुंवित्त्वागातुमित ॥ मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः ॥ १ ॥
कार्येनवा पुनःस्थापितं पठेत् इति मंत्रेणपिण्डं विसर्जयेत् इति संक्षेपः तर्पणविधिः

॥ मासंपूर्णमगमत् श्रीरामायनमः ॥

राम: ५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नोदकं ॥१॥ ततः सर्वं कृत्वा पूर्वाभिमुखो भूत्वा आवाह्य वस्त्रादीन् पूजयेत् ॥ ॐ ब्रह्म
यज्ञानमितिब्रह्मणे नमः ॥ ॐ इदं विष्णुर्विचक्रमे इति विष्णवे नमः ॥ ॐ नमस्ते रुद्रेति रुद्राय न
मः ॥ ॐ भूर्भुवः स्वः इति सवित्रे नमः ॥ ॐ मित्रस्य चर्षणीधृतो श्रवो देवस्य सानसी ॥ द्यु
म्नं चित्रश्रवस्तमं ॥ ॐ मित्राय नमः ॥ ॐ वरुणस्यो त्तम्भनमसि इति वरुणाय नमः
॥ ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते ॥ अनुकम्पय माम्भक्त्या गृहाणार्घ्यं
दिवाकरः ॥१॥ अनेन मन्त्रेण सूर्यायार्घं दद्यात् ॥ ॐ अदृश्रमस्य केतवो विरश्मयो जनाँ
॥ अनु भ्राजन्तो अग्नयो यथा ॥ उपयामगृहीतोसि सूर्याय त्वा भ्राजायैष ते योनिः सू
र्याय त्वा भ्राजाय सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोहं मनुष्येषु भूयासम्
॥१॥ ॐ हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृ
तसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥२॥ इति मन्त्राभ्यां सूर्यमुपस्था
य ॥ प्रदक्षिणीकृत्य ॥ दिग्देवताभ्यः प्रणमेत् ॥ ॐ प्राच्यै दिशे नमः ॐ इन्द्राय नमः ॐ आग्ने
ॐ य्यै दिशे नमः ॐ अग्नये नमः ॐ दक्षिणायै दिशे नमः ॐ यमाय नमः ॐ नैरृत्यै दिशे नमः ॐ निर्ऋ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पितर इहागच्छन्तु इह तिष्ठन्तु ॐ कव्यवाडनलस्तृप्यतामिदं तिलोदकं तस्मै
स्वधा नमः ॥३॥ ॐ सोमस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ॥३॥ ॐ य
मस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ॥३॥ ॐ अर्यमा तृप्यतामिदं ति
लोदकं तस्मै स्वधा नमः ॥३॥ ॐ अग्निष्वात्तास्तृप्यन्तामिदं तिलोदकं तेभ्यः स्व
धा नमः ॥३॥ ॐ सोमपास्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधा नमः ॥३॥ ॐ ब
र्हिषदस्तृप्यन्तामिदं तिलोतेभ्यः स्वधा नमः ३ ॐ यमाय नमः ३ ॐ धर्मराजाय न
मः ३ ॐ मृत्यवे नमः ३ ॐ अन्तकाय नमः ३ ॐ वैवस्वताय नमः ॐ कालाय न
मः ३ ॐ सर्वभूतक्षयाय नमः ॐ औदुम्बराय नमः ३ ॐ दध्नाय नमः ३ ॐ नीला
य नमः ३ ॐ परमेष्ठिने नमः ३ ॐ वृकोदराय नमः ३ ॐ चित्राय नमः ३ ॐ चित्र देला
गुप्ताय नमः ३ ॐ ॥ तत आगच्छन्तु मे पितर इमां गृह्णन्त्वपोऽञ्जलीं निति पितरा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

त. प.
३

वाहुतर्पयेत्। ॐ उदीरितामवर उत्परास उन्मध्यमाः पितरः सोम्यासः असुंयई
युरव्रका ऋतज्ञास्ते नोवन्तु पितरोहवेषु। ॐ अद्येहामुकगोत्रास्मत्पिता ऽमुक
शर्मा वसुस्वरूपस्तृप्यता मिदंतिलोदकं तस्मै स्वधा। इति प्रथमाञ्जलिं पीत्रे
दद्यात्। ॐ अंगिरसो नः पितरो नवग्वा ऽअथर्वाणो भृगवः सोम्यासः तेषां वय
ं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम। अनेन मंत्रेण पूर्ववद्वितीयां
यांजलिं पित्रे दद्यात्। ॐ आयन्तु नः पितरः सोम्यासो ऽग्निष्वात्ताः पथि
भिर्देवयानैः अस्मिन्यज्ञे स्वधया मदन्तो ऽधिब्रुवन्तु ते ऽवन्त्वस्मान्। ३ अ
नेन मंत्रेण पूर्ववत्तृतीयाञ्जलिं पित्रे दद्यात्। ॐ ऊर्जं वहन्तीरमृतं घृतं ४
पयः कीलालं परिस्रुतम् स्वधास्थ तर्पयत मे पितॄन्॥१॥ ॐ अद्येहाऽमु
कगोत्रा ऽस्मत्पितामहो ऽमुकशर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं ३

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection, Nagarjun 7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मै स्वधा नमः इति पितामहाय प्रथमांजलिं दद्यात् ॥ ॐ पितृभ्यः स्वधायिभ्यः
स्वधा नमः ॥ पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधा
यिभ्यः धा नमः ॥ अक्षन्नमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुं
धध्वं ॥ २ ॥ अनेन मंत्रेण पितामहाय पूर्ववत् द्वितीयांजलिं दद्यात् ॥
ॐ ये चेह पितरो ये च नेह यांश्च विद्म यांउ च न प्रविद्म त्वं वेत्थ यति ते
जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व ॥ ३ ॥ अनेन मंत्रेण पितामहाय
पूर्ववत् तृतीयांजलिं दद्यात् ॥ ॐ मधुवाताऽऋतायते मधुक्षरन्ति सिं
धवः माध्वीर्नः सन्त्वोषधीः ॥ १ ॥ ॐ अद्येहा अमुकगोत्रा मम प्रपितामहो अ
मुकशर्माऽऽदित्यरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः इति प्र
पितामहाय प्रथमांजलिं दद्यात् ॥ ॐ मधु नक्तमुतोषसो मधुमत्पार्थि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

ॐ मधुमान्नो वनस्पतिर्मधुमाँ ऽ अस्तु सूर्यः ॥ माध्वीर्गावो भवन्तु नः ॥३॥ अनेन मंत्रेण प्रपितामहाय पूर्वादि
यांजलिं दद्यात् ।

CC-0. Digitized by eGangotri and MIDF- Delhi

त.प. वत्रजः मधु द्यौरस्तु नः पिता ॥२॥ अनेन मंत्रेण प्रपितामहाय ॥ पूर्ववद्द्विती-
४ यांजलिं दद्यात् ॥ ॐ अद्येहामुकगोत्रा ऽस्मन्माता ऽमुकी देवी वसुस्वरूपा
तृप्यताम् इदं तिलोदकं तस्यै स्वधा नमः इति त्रः ॥ ॐ अद्येहा ऽमुकगोत्रा ऽ
स्मत्पितामही अमुकी देवी रुद्रस्वरूपा तृप्यताम् इदं तिलोदकं तस्यै स्वधा नमः
॥ इति त्रिः ॥ ॐ अद्येहामुकगोत्रा ऽस्मत्प्रपितामही अमुकी देवी आदित्यस्वरूपा तृप्य-
ताम् इदं तिलोदकं तस्यै स्वधा नमः इति त्रिः ॥ तृप्यध्वम् इति त्रिः ॥ नमो वः पितरो रसाय
नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घो-
राय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पि-
तरो देष्मैतद्वः पितरो वासः ॥ ॐ अद्येहामुकगोत्रा ऽस्मन्मातामह अमुकशर्मा वसुस्वरूपस्तृ-
प्यताम् इदं तिलोदकं तस्मै स्वधा नमः इति प्रथमांजलिं मातामहाय दद्यात् ॥ ॐ नमो वः इ-
ति मंत्रेण पूर्ववद्द्वितीयतृतीयांजलिं मातामहाय दद्यात् ॥ ॐ नमो वः इति मंत्रेण ॥ ॐ अद्या

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुकगोत्रा ऽस्मत्प्रमातामहो मुकशर्मा रुद्रस्वरूपस्तृप्यताम् इदं तिलोदकं तस्मै स्वधा नमः
इति प्रमातामहाय प्रथमद्वितीयान्तौ तीर्थाञ्जलीं दद्यात् ॥ ॐ नमो वः शोषं मं ग्रस्मा० ॐ अ
द्यामुकगोत्रा ऽस्मत्वृद्धप्रमातामहो मुकशर्मा ऽऽदित्यस्वरूपस्तृप्यताम् इदं तिलोदकं
तस्मै स्वधा नमः इति वृद्धप्रमातामहाय प्रथमद्वितीयान्तौ तीर्थाञ्जलीं दद्यात् ॥ ॐ
अद्येहामुकगोत्रा ऽस्मत्प्रमातामह्यमुकदेवी रुद्रस्वरूपास्तृप्यताम् इदं तिलोद
कं तस्यै स्वधा नमः ॥ इति त्रिः ॐ अद्येहामुकगोत्रा ऽस्मत्प्रमातामही वृद्धप्रमाता
मह्यमुकदेवी आदित्यस्वरूपास्तृप्यताम् इदं तिलोदकं तस्यै स्वधा नमः ॥ इ
ति त्रिः ॥ ततः श्लोकानुसारेण ज्येष्ठकनेष्ठादि क्रमेण गोत्रं श्च तर्पयेत् ॥ माता
म्वसा तयं सपत्न जननी मातामहादि त्रयं स्वस्त्रीस्त्री तनयादि तात जननी स्व

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

८ मनुष्य नो यक्ष्म सिरगः ॥ [illegible] ये बान्धवा अबान्धवा ये येऽन्यजन्मनि बान्धवाः ॥४॥
५ तेसर्वे तृप्तिमायांतु

CC-0. Digitized by eGangotri and MIDF- Delhi

गर्प. भ्रातरः स्वस्त्रीयः ॥ तातातामातामहभगिन्यपत्यधनयुक् जायापितासद्गुरुः शिष्या
५ प्ताः पितरो मृतास्त्वकविधौ तीर्थे तथा तर्पणे ॥१॥ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृ
मानवाः ॥ तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥२॥ मातृवंशे मृता ये च पितृव
शे तथैव च ॥ गुरुश्वसुरबंधूनां ये चान्ये बांधवास्मृताः ॥३॥ ते सर्वे तृप्तिमखिलायां
तु मद्दत्तेनाम्बुनाखिलाः ॥ देवासुरास्तथा नागा गंधर्वराक्षसाः ॥५॥ पिशाचा गु
ह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः ॥ जलेचरा भूनिलया वाय्वाहाराश्च जन्त
वः ॥६॥ तेतृप्तिमखिलायांतु मद्दत्तेनाम्बुनाखिलाः ॥ नरकेषु समस्तेषु यातनासु
च ये स्थिताः ॥७॥ तेषामाप्यायनायैतद् दीयते सलिलं मया ॥ अतीतकुलकोटीनां सप्तः
सप्तद्वीपनिवासिनां ॥८॥ आब्रह्मभुवनाल्लोकानिदमस्तु तिलोदकं ॥ अथ वस्त्रनिष्पी स. ६
डनम् ॥ ये केचास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ॥ ते तृप्यन्तु मया दत्तं वस्त्रनिष्पीड ५

Jagannath Bhattarai Collection: Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi